# संस्कृत-वार्ता:

**दिनाङ्क :-18.07.2024**
**प्रात: - 06:55**

## अथ वार्ता:

**हरियाणा/आरक्षणम्**

हरियाणा-प्रशासनेन आरक्षि-खनन-कारागार-विभागेषु कतिपय-पदेभ्य: नियुक्तिकाले अग्निवीरेभ्य: दश-प्रतिशतम् आरक्षणं प्रदातुं निर्णीतम्। ह्य: चण्डीगढे मुख्यमन्त्री नायब-सिंह-सैनी: एतद् घोषितवान्। एतद् अतिरिच्य श्रीसैनी: वृत्तिकाले अग्निवीरेभ्य: प्रदीयमानानाम् अनेकविधानाम् ऋण-व्यापार-स्वास्थ्य-सम्बन्ध-सुविधानाम् अपि घोषणां कृतवान्।

**नड्डा/स्वास्थ्यम्**

स्वास्थ्य-परिवार-कल्याण-मन्त्री जगत-प्रकाश-नड्डा उक्तवान् यत् भारतस्य विश्व-स्तरीयौषधालयानां प्रतिष्ठानुरूपम् एव विश्व-स्तरीयौषध-नियामक-प्राग्रूपं निर्मातव्यम्। तेन उक्तं यत् उत्पादानां गुणवत्तां सुनिश्चेतुम् औषध-चिकित्सोपकरणोद्योगयो: पारस्परिक-विमर्श: निरन्तरं भवेत्।

**प्रधानमन्त्री/ मेक इन इंडिया**

प्रधानमन्त्रिणा नरेन्द्रमोदिना एकेन सामाजिक–संचार माध्यमेन प्रतिपादितं यत् 'मेक-इन-इंडिया' इत्यनया परियोजनया वैश्विक–पटले भारतीयार्थव्यवस्थाया: वृद्धि: द्रष्टुं शक्यते। स: सामाजिक–संचार पटले एतस्य वृद्धे: किंचित् प्रमाणम् अपि दत्तवान्। तेन लिखितं यत् इदानीं भारतीयद्विचक्रिकाया: अभ्यर्थना अखिले हि विश्वे भवति। ब्रिटेन–जर्मनी–नीदरलैंण्डदेशेषु निर्यातक्षेत्रे वृद्धि: अभवत् । एतेन अन्ताराष्ट्रियापणेषु भारतस्य वर्धमान–प्रभावस्य पुष्टि: भवति। प्रधानमन्त्रिणा लिखितं यत् साम्प्रतं बिहार–राज्ये निर्मितानां पादत्राणानां प्रयोग: रूस–देशस्य सैन्यबलै: क्रियते।

**महाराष्ट्रम्/नक्सलवादिव्यापादनम्**

महाराष्ट्रे गढ़चिरौली-छत्तीसगढ़-सीमायाम् एटापल्ली-प्रखण्डे गतसायं गढ़चिरौली-रक्षिबलस्य सी-सिक्स्टी-कमांडो-प्रभागस्य एकस्मिन् अभियाने द्वादश नक्सल-वादिन: मारिता:। एटापल्ली-प्रखण्डे वंडोली-ग्रामस्य वने नक्सल-रोध्यभियानावधौ संजाते संघर्षे रक्षिबलेन नक्सलवादिन: व्यापादिता:। घटना-स्थलात् विस्फोटकादीनि प्राप्तानि। संघर्षे रक्षिणौ अपि व्रणितौ। तौ चिकित्सार्थं नागपुरं नीतौ।

**सर्वदलीयोपवेशनम्**

सर्वकारेण संसदः वित्त-सङ्कल्पना-सत्रात् पूर्वं रविवासरे सर्वदलीयम् उपवेशनम् आहूतम्। उपवेशनस्य अवधौ प्रशासनं संसदः सदन-द्वयस्य सुचारुतया कार्याचरणाय सर्वेभ्यः राजनीतिक-दलेभ्यः सहयोगस्य अनुरोधं करिष्यति। वित्त-सङ्कल्पनासत्रम् अस्य मासस्य द्वाविंशति-दिनात् अगस्त-मासस्य द्वादश-दिनांकं यावत् चलिष्यति।

**विदेशमन्त्री/मॉरिशसम्**

विदेश-मन्त्रिणा डॉ.एस.जयशङ्करेण ह्य: मॉरीशस-देशस्य पूर्व-प्रधानमन्त्रिणा नवीन-रामगुलाम इत्यनेन अथ च पॉलबेरेन्जर इत्यमुना सह मेलनं कृतम्। डॉक्टर-रामगुलामेन सह मेलनावसरे डॉक्टर-जयशङ्करेण स्थायी द्विपक्षीय-सहयोग संवर्धनाय प्रतिबद्धता प्रकटिता। श्री पॉल बेरेन्जर इत्यमुना सह मेलन-विषये विदेश-मन्त्री अवादीत् यत् तेन समसामयिक-वैश्विक-विषयेषु सार्थक-संवादो विहित:।

**ऋतु-विज्ञान-विभाग:**

ऋतु-विज्ञान-विभागेन कर्णाटकस्य दक्षिण-भागे सौराष्ट्रे कच्छ-क्षेत्रे कोंकणे गोवायाम् अथ च तटीय-कर्नाटके पृथक्-पृथक् स्थानेषु अद्य यावत् प्रबल-वर्षाया: अनुमान: प्रकटित:।

**ओलंपिक्-क्रीडा:/भारतम्**

पेरिसे ओलंपिक्-क्रीडासु भारतस्य सप्तदशोत्तर-शतं क्रीडका: सहभागं करिष्यन्ति। खेल-मन्त्रालयेन एतद् अतिरिच्य कर्मकर-दलस्य चत्वारिंशदधिक-शत्-संख्याकेभ्य: सदस्येभ्य: अपि तत्र गमनाय स्वीकृति: दत्ता।

**।। इति वार्ता: ।।**